# १६ षोडश दशकः - सुदर्शन विवाहम्

श्रुत्वा वधू वाक्यमरं कुमारो हृष्टो भरद्वाज मुनिं प्रणम्य ।
आपृच्छ्य मात्रा सह देवि स त्वां स्मरन् रथेनाप पुरं सुबाहोः ॥ १६-१॥

स्वयंवराहूत महीभुजां स सभां प्रविष्टो हतभी र्निषण्णः ।
कन्या कला पूर्णशशी त्वसाविति आहुर्जनास्ता मभिवीक्षमाणाः ॥ १६-२॥

वधूश्च तद्दर्शन वर्धितानु-रागा स्मरन्ती तव वाक्य सारम् ।
सभां नृपाणा मजितेन्द्रियाणां न प्राविशत्सा पितृचोदिताऽपि ॥ १६-३॥

शङ्काकुलास्ते नृवरा बभूवुः उच्चै र्युधाजित्कुपितो जगाद- ।
मा दीयतां लोकहिता नभिज्ञा वधू रशक्ताय सुदर्शनाय ॥ १६-४॥

बालोऽयमित्येष मयाऽऽश्रमे प्राक् उपेक्षितः सोऽत्र रिपुत्वमेति ।
माऽयं च वध्वा व्रियतां वृतश्चेत् हन्यामिमं तां च हरेयमाशु ॥ १६-५॥

श्रुत्वा युधाजि द्वचनं नृपाला हितैषिणः केचि दुपेत्य सर्वम् ।
सुदर्शनं प्रोचु रथापि धीरः स निर्भयो नैव चचाल देवि ॥ १६-६॥

एकत्र पुत्री च सुदर्शनश्च युधाजि दन्यत्र बली सकोपः ।
तन्मध्यगो मंक्षु नृपः सुबाहुः बद्धाञ्जलिः प्राह नृपान् विनम्रः ॥ १६-७॥

नृपा वचो मे शृणुतेह बाला नायाति पुत्री मम मण्डपेऽत्र ।
तत्क्षम्यतां श्वोऽत्र नयाम्यहं तां याताद्य वो विश्रम मन्दिराणि ॥ १६-८॥

गतेषु सर्वेषु सुदर्शनस्तु त्वां संस्मरन् मातृहितानुसारी ।
सुबाहुना तन्निशि तेन दत्तां वधूं यथा विध्यु दुवाह देवि ॥ १६-९॥

प्रात र्युधाजित्प्रबलो विवाह वार्तां निशम्यात्त रुषा ससैन्यः ।
सुदर्शनं मातृ वधू समेतं यात्रोन्मुखं भीमरवो रुरोध ॥ १६-१०॥

ततो रणे घोरतरे सुबाहुः क्लीं क्लीमि तीशानि समुच्चचार ।
तत्राविरासीः समराङ्गणे त्वं सिंहाधिरूढा स्वजनार्ति हन्त्री ॥ १६-११॥

त्वन्नाम गायन् कथयन् गुणांस्ते त्वां पूजयंश्चात्र नयामि कालम् ।
स्वप्नेऽपि दृष्टा न मया त्वमम्बे कृपां कुरु त्वं मयि ते नमोऽस्तु ॥ १६-१२॥